# shaunakagItA

# શૌનકગીતા

## Document Information

Text title : shaunakagItA

File name : shaunakagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Sunder Hattangadi sunder at hotmail.com

Proofread by : Sunder Hattangadi sunder at hotmail.com

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શૌનકગીતા

॥ અથ શૌનકગીતા ॥

શોકસ્થાનસહસ્રાણિ ભયસ્થાનશતાનિ ચ ।
દિવસે દિવસે મૂઢમાવિશન્તિ ન પણ્ડિતમ્ ॥ ૧॥

ન હિ જ્ઞાનવિરુદ્ધેષુ બહુદોષેષુ કર્મસુ ।
શ્રેયોઘાતિષુ સજ્જન્તે બુદ્ધિમન્તો ભવદ્વિધાઃ ॥ ૨॥

અષ્ટાઙ્ગાં બુદ્ધિમાહુર્યા સર્વાશ્રેયોવિઘાતિનીમ્ ।
શ્રુતિસ્મૃતિસમાયુક્તાં રાજન્સા ત્વય્યવસ્થિતા ॥ ૩॥

અર્થકૃચ્છ્રેષુ દુર્ગેષુ વ્યાપત્સુ સ્વજનસ્ય ચ ।
શારીર માનસૈર્દુઃખૈર્નસીદન્તિ ભવદ્વિધાઃ ॥ ૪॥

શ્રૂયતાં ચાભિધાસ્યામિ જનકેન યથા પુરા ।
આત્મવ્યવસ્થાનકરા ગીતાઃ શ્લોકા મહાત્મના ॥ ૫॥

મનોદેહસમુત્થાભ્યાં દુઃખાભ્યાં મર્દિતં જગત્ ।
તયોર્વ્યાસસમાસાભ્યાં શમોપાયમિમં શ્રુણુ ॥ ૬॥

વ્યાધેરનિષ્ટસંસ્પર્શાચ્છ્રમાદિષ્ટવિવર્જનાત્ ।
દુઃખં ચતુર્ભિઃ શારીરં કારણૈઃ સમ્પ્રવર્તતે ॥ ૭॥

તદાતત્પ્રતિકારાચ્ચ સતતં ચાવિચિન્તનાત્ ।
આધિવ્યાધિપ્રશમનં ક્રિયાયોગદ્વયેન તુ ॥ ૮॥

મતિમન્તો હ્યતો વૈદ્યાઃ શમં પ્રાગેવ કુર્વતે ।
માનસસ્ય પ્રિયાખ્યાનૈઃ સંભોગોપનયૈર્નૃણામ્ ॥ ૯॥

માનસેનહિ દુઃખેન શરીરમુપતપ્યતે ।
અયસ્તપ્તેન પિણ્ડેન કુમ્ભસંસ્થમિવોદકમ્ ॥ ૧૦॥

માનસં શમયેત્તસ્માજ્જ્ઞાનેનાગ્નિમિવામ્બુના ।

પ્રશાન્તે માનસે હ્યસ્ય શારીરમુપશામ્યતિ ॥ ૧૧॥

મનસો દુઃખમૂલં તુ સ્નેહ ઇત્યુપલભ્યતે ।
સ્નેહાત્તુ સજ્જતે જન્તુર્દુઃખયોગમુપૈતિ ચ ॥ ૧૨॥

સ્નેહમૂલાનિ દુઃખાનિ સ્નેહજાનિ ભયાનિ ચ ।
શોકહર્ષૌ તથાયાસઃ સર્વસ્નેહાત્પ્રવર્તતે ॥ ૧૩॥

સ્નેહાદ્ભાવોઽનુરાગશ્ચ પ્રજજ્ઞે વિષયે તથા ।
અશ્રેયસ્કાવુભાવેતૌ પૂર્વસ્તત્ર ગુરુઃ સ્મૃતઃ ॥ ૧૪॥

કોટરાગ્નિર્યથાશેષં સમૂલં પાદપં દહેત્ ।
ધર્માર્થૌ તુ તથાઽલ્પોઽપિ રાગદોષો વિનાશયેત્ ॥ ૧૫॥

વિપ્રયોગેન તુ ત્યાગી દોષદર્શી સમાગમે ।
વિરાગં ભજતે જન્તુર્નિર્વૈરો નિરવગ્રહઃ ॥ ૧૬॥

તસ્માત્સ્નેહં ન લિપ્સેત મિત્રેભ્યો ધનસંચયાત્ ।
સ્વશરીરસમુત્થં ચ જ્ઞાનેન વિનિવર્તયેત્ ॥ ૧૭॥

જ્ઞાનાન્વિતેષુ યુક્તેષુ શાસ્ત્રજ્ઞેષુ કૃતાત્મસુ ।
ન તેષુ સજ્જતે સ્નેહઃ પદ્મપત્રેષ્વિવોદકમ્ ॥ ૧૮॥

રાગાભિભૂતઃ પુરુષઃ કામેન પરિકૃષ્યતે ।
ઇચ્છા સંજાયતે તસ્ય તતસ્તૃષ્ણા વિવર્ધતે ॥ ૧૯॥

તૃષ્ણાહિ સર્વપાપિષ્ઠા નિત્યોદ્વેગકરી સ્મૃતા ।
અધર્મબહુલા ચૈવ ઘોરા પાપાનુબન્ધિની ॥ ૨૦॥

યા દુસ્ત્યજા દુર્મતિભિર્યા ન જીર્યતિ જીર્યતઃ ।
યોસૌ પ્રાણાન્તિકો રોગસ્તાં તૃષ્ણાં ત્યજતઃ સુખમ્ ॥ ૨૧॥

અનાદ્યન્તા હિ સા તૃષ્ણા અન્તર્દેહગતા નૃણામ્ ।
વિનાશયતિ ભૂતાનિ અયોનિજ ઇવાનલઃ ॥ ૨૨॥

યથૈધઃ સ્વસમુત્થેન વહ્નિના નાશમૃચ્છતિ ।
તથાઽકૃતાત્મા લોભેન સહજેન વિનશ્યતિ ॥ ૨૩॥

રાજતઃ સલિલાદગ્નેશ્ચોરતઃ સ્વજનાદપિ ।
ભયમર્થવતાં નિત્યં મૃત્યોઃ પ્રાણભૃતામિવ ॥ ૨૪॥

યથા હ્યામિષમાકાશે પક્ષિભિઃ શ્વાપદૈર્ભુવિ ।
ભક્ષ્યન્તે સલિલે મત્સ્યૈસ્તથા સર્વત્ર વિત્તવાન્ ॥ ૨૫॥

અર્થ એવ હિ કેષાંચિદનર્થં ભજતે નૃણામ્ ।
અર્થ શ્રેયસિ ચાસક્તો ન શ્રેયો વિન્દતે નરઃ ॥ ૨૬॥

તસ્માદર્થાગમાઃ સર્વે મનોમોહવિવર્ધનાઃ ।
કાર્પણ્યં દર્પમાનૌ ચ ભયમુદ્વેગ એવ ચ ॥ ૨૭॥

અર્થજાનિં વિદુઃ પ્રાજ્ઞા દુઃખન્યેતાનિ દેહિનામ્ ।
અર્થસ્યોત્પાદને ચૈવ પાલને ચ તથાક્ષયે ॥ ૨૮॥

સહન્તિ ચ મહદ્દુઃખં ઘ્નન્તિ ચૈવાર્થકારણાત્ ।
અર્થાદ્દુઃખં પરિત્યક્તં પાલિતાશ્ચૈવ શત્રવઃ ॥ ૨૯॥

દુઃખેન ચાધિગમ્યન્તે તસ્માન્નાશં ન ચિન્તયેત્ ।
અસન્તોષપરા મૂઢાઃ સન્તોષં યાન્તિ પણ્ડિતાઃ ॥ ૩૦॥

અન્તો નાસ્તિ પિપાસાયાઃ સન્તોષઃ પરમં સુખમ્ ।
તસ્માત્સન્તોષમેવેહ પરં પશ્યન્તિ પણ્ડિતાઃ ॥ ૩૧॥

અનિત્યં યૌવનં રૂપં જીવિતં રત્નસંચયઃ ।
ઐશ્વર્યં પ્રિયસંવાસો ગૃદ્ધ્યેત્તત્ર ન પણ્ડિતઃ ॥ ૩૨॥

ત્યજેત સઞ્ચયાંસ્તસ્માત્તજ્જાન્ક્લેશાન્ સહેત ચ ।
ન હિ સઞ્ચયવાન્કશ્ચિદ્દૃશ્યતે નિરુપદ્રવઃ ।
અતશ્ચ ધાર્મિકૈઃ પુંભિરનીહાર્થઃ પ્રશસ્યતે ॥ ૩૩॥

ધર્માર્થં યસ્ય વિત્તેહા વરં તસ્ય નિરીહતા ।
પ્રક્ષાલનાદ્ધિ પઙ્કસ્ય શ્રેયો ન સ્પર્શનં નૃણામ્ ॥ ૩૪॥

યુધિષ્ઠિરૈવં સર્વેષુ ન સ્પૃહાં કર્તુમર્હસિ ।
ધર્મેણ યદિ તે કાર્યં વિમુક્તેચ્છો ભવાર્થતઃ ॥ ૩૫॥

॥ ઇતિ શૌનકગીતા સમાપ્તા ॥

From Mahabharata Vanaparva Adhyaya 2, shloka 15-48.

Encoded and proofread by Sunder Hattangadi sunder at hotmail.com

*shaunakagItA*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*